## अल्पे । (८५/२०४०)

परिमाणापचये अल्पशब्दः । [1]प्रकृतिविशेषणं चैतत् । अल्पत्वविशिष्टे अर्थे वर्तमानात् [2]प्रातिपदिकात् यथाविहितं [3]प्रत्ययो भवति । अल्पं तैलम् तैलकम् । घृतकम् । सर्वकम् । [4]विश्वकम् । उच्चकैः । नीचकैः । पचतकि । जल्पतकि ॥

## ह्रस्वे । (८६/२०४१)

ह्रस्वत्वविशिष्टेऽर्थे वर्तमानात् [5]प्रातिपदिकात् यथाविहितं प्रत्ययो भवति । [6]दीर्घप्रतियोगी ह्रस्वः । ह्रस्वो वृक्षः वृक्षकः । [7]प्लक्षकः । [8]स्तम्भकः ॥

## सञ्ज्ञायां कन् । (८७/२०४२)

ह्रस्वे इत्येव । [9]ह्रस्वत्वहेतुका या सञ्ज्ञा तस्यां गम्यमानायां कन्प्रत्ययो भवति । [10]पूर्वस्यायमपवादः । वंशकः । वेणुकः । [11]दण्डकः ॥

## कुटीशमीशुण्डाभ्यो रः । (८८/२०४३)

ह्रस्वे इत्येव । सञ्ज्ञाग्रहणं नानुवर्तते । सामान्येन विधानम् । [12]कुटीशमी[13]शुण्डाभ्यो [14]ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति । कस्यापवादः । ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः । स्वार्थिकत्वेऽपि पुंलिङ्गता, लोकाश्रयत्वाल् लिङ्गस्य [15](व्या.प. ७४) ॥

## कुत्वा डुपच् । (८९/२०४४)

ह्रस्वे इत्येव । कुतूशब्दाद् ह्रस्वत्वे द्योत्ये डुपच्प्रत्ययो भवति । कस्यापवादः । ह्रस्वा कुतूः [16]कुतुपम् । चर्ममयं स्नेहभाजनमुच्यते । [17]कुतूः इत्यावपनस्याख्या ॥

## कासूगोणीभ्यां ष्टरच् । (९०/२०४५)

ह्रस्वे इत्येव । कासूगोणीशब्दाभ्यां [18]ह्रस्वस्त्वे द्योत्ये ष्टरच् प्रत्ययो भवति । कस्यापवादः । षकारो ङीषर्थः । ह्रस्वा कासूः [19]कासूतरी । गोणीतरी । [20]कासूः इति शक्तिः, आयुधविशेषः उच्यते[21] ॥

---

1. प्रकृति नास्ति ह. 2. शब्दात् ब. 3. काकचौ प्रत्ययौ भवतः ग. 4. विश्वाकम् क. 5. शब्दात् स्वार्थे ङ.फ. 6. दीर्घत्वप्रतियोगी गुणो ह्रस्वः । ह्रस्वः पटः पटकः ग. 7. प्लक्षकः नास्ति ङ. 8. स्तम्बकः क, स्तबकः ह. 9. ह्रस्वहेतुका फ, ह्रस्वहेतुः सञ्ज्ञा क. 10. कस्यापवादः क. 11. नडकः क.ह, दन्तकः ग. 12. कुटी शमी शुण्डा इत्येतेभ्यः शब्देभ्यः ब.फ. 13. शुण्डाशब्देभ्यः ह. 14. ह्रस्वत्वे क. 15. इति इत्यधिकम् क. 16. कुतुपः चर्ममयस्नेहभाजनम् क. 17. कुतुपः इति तस्यैवाख्या क. 18. ह्रस्वे क. 19. कासुतरी क.फ. 20. कासुः शक्तिः ग. 21. गोणीतरी आवपनस्याख्या इत्यधिकम् क.